# संस्कृतवार्ताः

**दिनाङ्क :-24.10.2024**
**प्रात: - 06:55**

## अथ वार्ता:

### प्रधानमन्त्री-प्रत्यागमनम्

प्रधानमन्त्री नरेन्द्रमोदी रूसदेशस्य  कजाननगरे समायोजिते ब्रिक्सइतिशिखरसम्मेलने भागग्रहणानन्तरं नवदिल्लीं प्रति आगतवान्। निजयात्रावधौ प्रधानमन्त्री श्रीमोदी चीनदेशीयेन राष्ट्रपतिना शी-जिनपिंग इत्यनेन अथ च रूसदेशीयेन राष्ट्रपतिना व्लादिमीरपुतिन इत्यमुना अपि च नवनिर्वाचितेन ईरानदेशीयेन राष्ट्रपतिना मसूद-पेजेकिशयनइत्यमुना साकं द्विपक्षीय-उपवेशनानि विहितवान्। श्रीमोदी उज्बेकिस्तानदेशस्य राष्ट्रपतिना शौकत-मिर्जियोयेवइत्येतेन संयुक्तारबामीरातस्य च राष्ट्रपतिना शेख-मोहम्मद-बिन-जायद-अल-नाह्यान-इत्यनेन साकमपि द्विपक्षीयसम्वादं कृतवान्। चीनदेशीयेन राष्ट्रपतिना सह जाते प्रधानमन्त्रिण: उपवेशने सनिश्चितं जातं यत् भारत-चीनदेशयोर्मध्ये स्थिर-अनुमानित-सौहार्दपूर्ण-द्विपक्षीय सम्बन्धानां क्षेत्रीय-वैश्विक शान्तौ समृद्धौ च साकारात्मकं प्रभावं भविष्यति इति। ब्रिक्ससमूहस्य नेतॄन् सम्बोधयन् श्रीमोदी अवोचत् यत् ब्रिक्सइति समूह: विश्वस्य चत्वारिंशत् प्रतिशतं मानवताया: प्रायश: च  त्रिंशत्प्रतिशतं यावत् अर्थव्यवस्थाया: प्रतिनिधित्वं करोतीति। अनेन समूहेन विगतेषु विंशतिवर्षेषु अनेके कीर्तिमन्त: स्थापिता:।

### जर्मन-ओलाफ-शोल्जइति

जर्मनदेशीय: कुलाधिपति: ओलाफ-शोल्ज इत्येष: अद्यारभ्य दिनत्रयं यावत् भारतस्य यात्रायाम् आयाति। अत्रावसरे श्रीशोल्जइत्येष: सप्तमे अन्तासर्वकारीय-परामर्श-समूहे भागं स्वीकरिष्यति। प्रधानमन्त्री नरेन्द्रमोदी श्री शोल्ज: च शुक्रवासरे अस्य समूहस्य उपवेशनस्य सहाध्यक्षतां करिष्यत:। समूहोऽयं एका सर्वकारीयव्यवस्थास्ति, यस्यान्तर्गतं उभयो: पक्षयो: मन्त्रिण: निजाधिकार-क्षेत्रेषु विचारविमर्शं विधास्यन्ति अपि च निष्कर्षस्य प्रतिवेदनानि प्रधानमन्त्रिणे कुलाधिपतये च प्रस्तुवन्ति।

### राजनाथ-चाणक्य:

रक्षामन्त्री राजनाथसिंह: अद्य नवदिल्ल्यां प्रमुख-अन्ताराष्ट्रिय-सङ्गोष्ठ्या: चाणक्य-रक्षा-संवाद इत्येतस्या: द्वितीय-संस्करणस्य उद्घाटनं करिष्यति। मन्त्री अत्रावधौ भारतीयसेनाया: प्रथमस्य हरितपदक्षेपस्य आई.ए. इत्यस्य प्रथम-आङ्ककीकरणस्य शुभारम्भं विधास्यति। 'विकास-सुरक्षयो: कृते भारतस्य दृष्टिकोणं' इत्यस्मिन् विषये मुख्यभाषणं दास्यति यस्मिन् विकसितभारतस्य प्राप्तये सकल-सुरक्षाया: महत्वं प्रतिपादयिष्यति। एतस्मिन् द्विदिवसात्मके संवादकार्यक्रमे नीतिनिर्मातार: रणनीतिकविचारका: शिक्षाविद: रक्षाकर्मिण: वैज्ञानिकाश्च भागं भजिष्यन्ति। संयुक्त-राज्यअमेरिका-रूस-इज़राइल-श्रीलङ्कादेशानां प्रमुखवक्तार: अपि भागं स्वीकरिष्यन्ति।

### दाना चक्रवात:

अद्य श्व: च अर्धरात्रौ पुरी - सागर-द्वीपयोर्मध्ये भीषणातिभीषणं दाना इत्याख्य: चक्रवातः इति सम्भाव्यते। चक्रवातावधौ वायुगतिः विंशत्यधिकै- कशतकिलोमीटर मिताया: वेगेन प्रवक्ष्यति प्रति होरा भविष्यति। भारत-ऋतु- विज्ञान- विभागेन ख्यापितं यत् बङ्गाल खातेः मध्ये निर्मितम् अल्पभार- युतं क्षेत्रं पश्चिमोत्तर-पश्चिमीयभागं प्रति संवर्धयिष्यति। विभागेन शुक्रवासरं यावत् ओडिशाराज्यस्य विविधेषु तटीयजनपदेषु निम्नवर्तिषु क्षेत्रेषु अत्यधिकवृष्टेः भविष्यवाणी कृता। धीवरेभ्यःच प्रत्यागमनाय आदेशः प्रदत्तः। तत्रैव राजधान्यां भुवनेश्वरे चतुर्विंशतिहोरां यावत् नियन्त्रणकक्षाः स्थापिताः। राष्ट्रियात्पद-बलं अन्यानि च बलानि तत्र नियोजितानि सन्ति।

**प्रधानमन्त्री-मन की बात**

प्रधानमन्त्री नरेन्द्र मोदी अक्टूबरमासस्य सप्तविंशे दिनाङ्के आकाशवाण्याः 'मन की बात' इत्यस्मिन् कार्यक्रमे देश-विदेशस्थजनैः सह स्वविचारान् विनिमयीकरिष्यति। इदं मासिक- रेडियो - कार्यक्रमस्य पञ्चदशाधिक - शततमं संस्करणं भविष्यति।

**भारतक्रिकेट्**

क्रिकेट्प्रतिस्पर्धायां, भारतन्यूजीलैण्डदलयोर्मध्ये द्वितीया क्रिकेट्-निकषस्पर्धा अद्य पुणेनगरस्य महाराष्ट्र-क्रिकेट-सङ्घ-क्रीडाङ्गणे प्रात: सार्धनववादनतो भविष्यति।

**।।इति वार्ता:।।**